पूर्णः सदा शिवः” मा०प्र०भा०। वैवस्वतमनोः २पुत्रभेदे हरिवं०७अ० ।

**प्रकाशक** त्रि० प्रकाशयति प्र+काश-णिच्-ण्वुल्। १प्रकाशकारके सूर्य्यादौ सांख्यमतसिद्धे २सत्त्वगुणे च “तत्र सत्त्वं निर्म्मलत्वात् प्रकाशकमनामयम्” गीता ।

**प्रकाशकज्ञातृ** पु० प्रकाशकस्य पूर्वं ज्ञाता । कुक्कुटे शब्दच०। तस्य प्रथमं प्रकाशकसूर्य्यज्ञातृत्वात्तथात्वम् ।

**प्रकाशन** त्रि० प्रकाशयति प्र+काश--णिच्--ल्यु । १प्रकाशकारके २विष्णौ पु० । “नैकरूपो वृहद्रूपः शिपिविष्टः प्रकाशनः” विष्णुस० ।

**प्रकाशात्मन्** पु०प्रकाश आत्मा स्वरूपमस्य । १विष्णौ “प्रकाशात्मा प्रतापनः” विष्णुस०। २व्यक्तस्वभावे त्रि० ।

**प्रकाशित** त्रि०प्र+काश+णिच्--कर्म्मणि क्त । १प्रकटिते हेम० प्र+काश--कर्त्तरि क्त । २प्रकाशयुते त्रि०। भावे क्त । ३प्रकाशे न० ।

**प्रकाश्य** त्रि० प्र+काशि--कर्म्मणि यत्। १प्रकाशनीये २प्रायोश्यर्णशुद्ध्यादौ नवके न० काशी० १० अ०। नवनवकशब्दे ३९८८ पृ० दृश्यम् ।

**प्रकीर्ण** न० प्र+कॄ--कर्म्मणि क्त । १चामरे जटा० । २ग्रन्थविच्छेदे त्रिका० । ३विक्षिप्ते ४मिश्रिते विभिन्नजातीये त्रि० । ५पूतिकरञ्जे पु० राजनि० । भावे क्त । भिन्नजातीयानां ६मिश्रणे ७विक्षेपे ८विस्तारे च न० । स्वार्थे क । तत्रार्थे । अनुक्तप्रायश्चित्तविशेषे पातकविशेषे पातकशब्दे ४२९९ पृ० विष्णुवाक्यम् दृश्यम् । “अनुक्तं तत्प्रकीर्णकम्” अनुक्तमनुक्तनिष्कृतिकं पापं प्रकीर्णकमित्यर्थः । “अनुक्तनिष्कृतीनां तु पापानामपनुत्तये । शक्तिञ्चावेक्ष्य पापञ्च प्रायश्चित्तं प्रकल्पयेत्” विश्वामित्रः “प्रकीर्णपातके ज्ञात्वा गुरुत्वमथ लाघवम् । प्रायश्चित्तं बुधः कुर्य्यात् ब्राह्मणानुमतः सदा” विष्णुः । “क्रयविक्रयदुष्टभोजनप्रतिग्रहेषु अनादिष्टप्रायश्चित्तेषु चान्द्रायणं प्राजापत्यं वा” शङ्खलिखितौ । भट्टिकाव्ये नानाजातीयप्रत्ययोदाहरणात्मककाण्डं प्रकीर्णकाण्डम्। संज्ञायां कन् । तुरङ्गमे पुंस्त्री० स्त्रियां जातित्वात् ङीष् ।

**प्रकीर्य्य** पु० प्रकीर्य्यतेऽसौ प्र+कॄ--क्यप् । (नाटाकरमचा) १करञ्जभेदे अमरः । २पूतकरञ्जे ( रीठाकरमचा ) राजनि० । ३विक्षेप्ये ४व्याप्ये च त्रि० ।

**प्रकुञ्च** पु० “प्रकुञ्चः षोडशी विल्वं पलमेवात्र कीर्त्त्यते” भावप्र० उक्ते पलरूपे मानभेदे । “चूर्णप्रकुञ्चम्” इत्यादि सुश्रुतः

**प्रकुल** न० प्र+कुल-कर्त्तरि क । प्रशस्तदेहे त्रिकाण्डशेषः ।

**प्रकूष्माण्डी** स्त्री दुर्गायां हेमच० ।

**प्रकृत** त्रि० प्र+कृ--क्त । १अधिकृते २आरब्धे ३प्रकरणप्राप्ते च । ४ऋषिभेदे पु० । प्रकृतस्यर्षेर्गोत्रापत्यम् अश्वा० फञ् । प्राकृतायन तद्गोत्रापत्ये पुंस्त्री० ।

**प्रकृति** स्त्री प्र+कृ--कर्त्तरि क्तिच् भावादौ क्तिन् वा । १स्वभावे २योनौ ३लिङ्गे ४स्वाम्यमात्यादौ राज्याङ्गे अमरः । ५शिल्पिनि हेम०। ६शक्तौ ७योषिति शब्दर०। ८परमात्मनि धरणिः । १०आकाशादिभूतपञ्चके ११करणे १२गुह्ये १३जन्तौ च १४एकविंशत्यक्षरपादके छन्दोभेदे । १५मातरि १६प्रत्ययनिमित्ते शब्दभेदे तल्लक्षणं शब्द०प्र० उक्तं यथा “स्वोपस्थाप्ययदर्थस्य बोधने यस्य निश्चयः । तत्त्वेन हेतुरथ वा प्रकृतिः सा तदर्थिका । तत्त्वेन यन्निश्चयत्वेन स्वोपस्थाप्ययादृशार्थस्यान्वयबोधं प्रति स्वाव्यवहितोत्तरत्वसंसर्गेण यादृशशब्दवत्तानिश्चयत्वेन हेतुत्वं तादृश एव शब्दस्तथाविधार्थे प्रकृतिरिति तु फलितार्थः । बहुगुडो द्राक्षेत्यादौ बहुजाद्यर्थस्यान्वयबोधं प्रति गुडादिपदधर्म्मिकबहुजादिनिश्चयत्वेन न हेतुत्वमपि तु सुबादिधर्म्मिकबहुगुडादिपदनिश्चयत्वेन अन्यथा केवलादपि बहुगुडादिशब्दात् द्राक्षादौ बहुजाद्यर्थस्यान्वयबोधापत्तेरिति न तत्र प्रसङ्गः”। “निरुक्ता प्रकृतिर्द्वेधा नामधातुप्रभेदतः । यत् प्रातिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते । निरुक्ता न तु सांख्यानामिव जगदुपादानभूता । यच्च पाणिनिप्रभृतिभिः प्रातिपदिकं प्रकृतिरित्युक्तं तदपि नाम्नो नातिरिच्यते नातो विभागन्यूनता”। वैयाकरणमते तल्लक्षणन्तु शब्दार्थरत्नेऽस्माभिरुक्तं यथा “एवं प्रकृतिप्रत्ययादिसमुदायरूपपदस्वरूपे तद्विभागे च दर्शिते इदानीं तदवयवरूपप्रकृतिप्रत्ययस्वरूपविभागौ प्रदर्श्येते । तत्र प्रकृतिर्नाम अर्थावबोधहेतुः प्रत्ययविधानावधिभूतः शब्दविशेषः सर्वेषामेव च प्रत्ययानां प्रकृतिं निमित्तीकृत्यैव विधानात् । प्रत्ययानाञ्च प्रत्यायकत्वरूपेणैव निवेशः न तु वक्ष्यमाणप्रत्ययत्वेन तेन नान्योन्याश्रयः । अवधित्वञ्च पूर्वापरत्वरूपं ग्राह्यं तेन बहुजादेर्निमित्तप्रकृतौ नातिप्रसङ्गः । वस्तुतस्तु सिद्धान्ते वृत्तिशब्दानां समुदायशक्तिस्वीकारात् तद्धितादीनां निरर्थकत्वान्न तत्र प्रकृतिप्रत्ययादिविभागः । अत एव भाष्ये “तावेव सुप्तिङौ यौ ततः परौ नैव प्रकृतिराद्येति” सुप्तिङ्मात्रयोरेव प्रत्ययत्वमित्युक्तम् ।